# Shri Anantanandacharyakritam Shriramamantrarajaparampara Stotram

# શ્રીઅનન્તાનન્દાચાર્યકૃતં શ્રીરામમન્ત્રરાજપરમ્પરા સ્તોત્રમ્

## Document Information

Text title : Shri Anantanandacharyakritam Shriramamantrarajaparampara Stotram

File name : shrIrAmamantrarAjaparamparAstotram.itx

Category : raama, rAmAnanda, mantra, stotra

Location : doc_raama

Author : anantAnandAchArya

Transliterated by : Mrityunjay Pandey

Proofread by : Mrityunjay Pandey

Description/comments : From Chatuh Sampraday Dig-Darshan. Lineage explicitly listed.

Latest update : November 11, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

Shri Anantanandacharyakritam Shriramamantrarajaparampara Stotram

# શ્રીઅનન્તાનન્દાચાર્યકૃતં શ્રીરામમન્ત્રરાજપરમ્પરા સ્તોત્રમ્

પરધામ્નિ સ્થિતો રામઃપુણ્ડરીકાયતેક્ષણઃ ।
સેવયા પરયા જુષ્ટો જાનક્યૈ તારકં દદૌ ॥ ૧॥

શ્રિયઃ શ્રીરપિ લોકાનાં દુખોદ્ધરણહેતવે ।
હનૂમતે દદૌ મન્ત્રં સદા રામાઙ્ઘ્રિસેવિને ॥ ૨॥

તતસ્તુ બ્રહ્મણા પ્રાપ્તો મુહ્યમાનેન માયયા ।
કલ્પાન્તરે તુ રામો વૈ બ્રહ્મણે દત્તવાનિમમ્ ॥ ૩॥

મન્ત્રરાજજપં કૃત્વા ધાતા નિર્માતૃતાં ગતઃ ।
ત્રયીસારમિમં ધાતુર્વસિષ્ઠો લબ્ધવાન્ પરમ્ ॥ ૪॥

પરાશરો વસિષ્ઠાચ્ચ સર્વસંસ્કારસંયુતમ્ ।
મન્ત્રરાજં પરં લબ્ધ્વા કૃતકૃત્યો બભૂવ હ ॥ ૫॥

પરાશરસ્ય સત્પુત્રો વ્યાસઃ સત્યવતીસુતઃ ।
પિતુઃ ષડક્ષરં લબ્ધ્વા ચક્રે વેદોપબૃંહણમ્ ॥ ૬॥

વ્યાસોઽપિ બહુશિષ્યેષુ મન્વાનઃ શુભયોગ્યતામ્ ।
પરમહંસવર્ય્યાય શુકદેવાય દત્તવાન્ ॥ ૭॥

શુકદેવકૃપાપાત્રો બહ્મચર્યવ્રતેસ્થિતઃ ।
નરોત્તમસ્તુ તચ્છિષ્યો નિર્વાણપદવીં ગતઃ ॥ ૮॥

સ ચાપિ પરમાચાર્યો ગઙ્ગાધરાય સૂરયે ।
મન્ત્રાણાં પરમં તત્ત્વં રામમન્ત્રં પ્રદત્તવાન્ ॥ ૯॥

ગઙ્ગાધરાત્ સદાચાર્યસ્તતો રામેશ્વરો યતિઃ ।
દ્વારાનન્દસ્તતો લબ્ધ્વા પરબ્રહ્મરતોઽભવત્ ॥ ૧૦॥

દેવાનન્દસ્તુ તચ્છિષ્યઃ શ્યામાનન્દસ્તતોઽગ્રહીત્ ।

તત્સેવયા શ્રુતાનન્દશ્ચિદાનન્દસ્તતોઽભવત્ ॥ ૧૧॥

પૂર્ણાનન્દસ્તતો લબ્ધ્વા શ્રિયાનન્દાય દત્તવાન્ ।
હર્યાનન્દો મહાયોગી શ્રિયાનન્દાઙ્ઘ્રિસેવકઃ ॥ ૧૨॥

હર્યાનન્દસ્ય શિષ્યો હિ રાઘવાનન્દદેશિકઃ ।
યસ્ય વૈ શિષ્યતાં પ્રાપ્તો રામાનન્દઃ સ્વયં હરિ ॥ ૧૩॥

તસ્માદ્ ગુરુવારલ્લબ્ધ્વા દેવાનામપિ દુર્લભમ્ ।
પ્રાદાત્તુભ્યમહન્તાત ગુહ્યં તારકસંજ્ઞકમ્ ॥ ૧૪॥

એવં પરમ્પરા સૌમ્ય પ્રોક્તા શ્રીસમ્પ્રદાયિનામ્ ।
મન્ત્રરાજસ્ય ચાખ્યાતિર્ભૂમ્યામેવમવાતરત્ ॥ ૧૫॥

ઇતિ શ્રીઅનન્તાનન્દાચાર્યકૃતં શ્રીરામમન્ત્રરાજ-પરમ્પરાસ્તોત્રં સમ્પૂર્ણમ્ ।

Lineage of Shri Ram Mantraraj Parampara

01) Bhagavān Śrī Rāma (Nitya-Bihārī, and appearance day in Vibhūti-Lōka : Śrī Rāmanavamī, Trētāyuga)

02) Śrīmati Sītā (Nitya-Bihāriṇī, and appearance day in Vibhūti-Lōka : Vaiśākha Śukla Navamī, Trētāyuga )

03) Śrī Hanumāna (Kārtika Kṛṣṇa Caturdaśī)

04) Śrī Brahmā (Akṣaya Navamī, Satayuga)

05) Śrī Vaśiṣṭha (ṛṣi Paṃcamī, Satayuga)

06) Śrī Parāśara (Āśvina Śukla 15, Satayuga)

07) Śrī Vyāsa (Guru Pūrṇimā, Dvāpara Yuga)

08) Śrī Śukadēva Muni (Śrāvaṇa Śukla 15, Dvāpara Yuga)

09) Maharṣi Bōdhāyana (Śrī Puruṣōttamācārya) (Pauṣa Kṛṣṇa 12, Vikrama Saṃvat Pūrva 569-320)

10) Śrī Gangādharācārya (Māgha Kṛṣṇa 11, Vi.Pū. 479-289)

11) Śrī Sadānandācārya (Māgha Śukla 5, Vi.Pū. 337-80)

12) Śrī Rāmēśvarānandācārya (Vaiśākha Śukla 3, Vi.Pū. 136-236)

13) Śrī Dvārānandācārya (Phālguna 15, Vikrama Saṃvat 196-376)

14) Śrī Dēvānandācārya (Vaiśākha Śukla 10, Vi.Saṃ. 326-526)

15) Śrī Śyāmānandācārya (Āśvina Śukla 2, Vi.Saṃ. 486-686)

16) Śrī Śrutānandācārya (Śrāvaṇa Śukla 7, Vi.Saṃ. 636-836)

17) Śrī Cidānandācārya (Caitra Pūrṇimā, Vi.Saṃ. 746-896)

18) Śrī Pūrṇānandācārya (Vaiśākha Kṛṣṇa 13, Vi.Saṃ. 866-1067)

19) Śrī Śriyānandācārya (Vaiśākha Śukla 9, Vi.Saṃ. 1026-1206)

20) Śrī Haryānandācārya (Āśvina Śukla 11, Vi.Saṃ. 1156-1256)

21) Śrī Rāghavānandācārya (Caitra Śukla 11, Vi.Saṃ. 1206-1396)

22) Ananda Bhashyakar Jagadguru Bhagavad Śrī Rāmānandācārya (Māgha Kṛṣṇa 7, Vi.Saṃ. 1256-1532)

Encoded and proofread by Mrityunjay Pandey

---

*Shri Anantanandacharyakritam Shriramamantrarajaparampara Stotram*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*